॥ ओ३म् ॥

संसार तापदग्धानां त्रयो
विश्रान्ति हेतवः।
अपत्यञ्च कलत्रञ्च सतां
संगतिरेव च॥

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

निःस्पृहो नाधिकारी
स्यान्नाकामी मण्डनप्रियः।
ना विदग्धः प्रियं ब्रूयान
स्पष्टवक्तान वंचकः॥

( चाणक्य-नीति )

卐 वर्षम्-७ 卐 अंकः-२२ (१६४) 卐 १६ मईमासः २०१८ तः ३१ मईमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८


## राष्ट्रपतिमहोदयानां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे दीक्षान्तभाषणम्

–डॉ. प्रवेशव्यासः

नवदेहली, शनिवासरः, 21 अप्रैल 2018 दिनांके पूर्वाह्ने 11 वादने श्रीलालबहादुरशास्त्रीराष्ट्रिय– संस्कृतविद्यापीठे सप्तदशदीक्षान्तसमारोहस्यायोजनमभवत्, यस्मिन् भारतस्य माननीयराष्ट्रपतिमहोदयाः श्रीरामनाथकोविन्दमहाभागाः




मुख्यातिथित्वेन दीक्षान्तभाषणमकुर्वन्। समारोहस्य शुभारम्भः दीपप्रज्ज्वलनेन सह वैदिक–लौकिक–प्राकृतमंगलाचरणैः अभवत्। समागतानामतिथीनां स्वागतं कुर्वन्तः विद्यापीठस्य कुलपतयः प्रो. रमेशकुमारपाण्डेय महाभागाः अब्रुवन् यद् भारतीयसंस्कृतेः संस्कृतस्य च समुन्नयनेऽयं गरिमामयदीक्षान्तकार्यक्रमः आयोजितोऽस्ति। स्वोद्बोधने राष्ट्रपतिमहाभागाः पूर्वप्रधानमन्त्रिणं स्वर्गीयश्रीलाल बहादुरशास्त्रिणं भावपूर्ण संस्मृत्य तेषां प्रति असाधारणसम्माननं प्रकटिवन्तः। तैर्भणितं यद् अन्ताराष्ट्रियसंस्कृतशोधसंस्थानरूपे शास्त्रीमहाभागानां स्वप्नपूर्तौ विद्यापीठं प्रयासरतमस्ति। 'वसुधैव कुटुम्बकम्' 'विद्या ददाति विनयम्' 'सा विद्या या विमुक्तये' 'द्यौः शान्तिः..' एतैः नीतिवचोभिः सह तैः कथितं यत् संस्कृतेन भारतस्यात्मा परिलक्षितं भवति। इयं भाषा विश्वकल्याणाय प्रासंगिका वर्तते। संस्कृते बौद्धिकविकासस्य एका गौरवशालिनी परम्परा विद्यमाना। संस्कृतं ज्ञानस्यैव नहि अपितु विज्ञानस्यापि भाषा अस्तीति। संस्कृतस्य प्रसिद्धप्राचीनवैज्ञानिकेषु आर्यभट–वराहमिहिर–भास्कर–चरक–सुश्रुतादयः प्रमुखाः सन्ति। पाणिनीव्याकरणं सर्वाधिकं व्यवस्थितमस्ति। विदुषामनुसारेण संस्कृतभाषा 'कम्प्यूटर–एलगोरिदम', 'आर्टिफिशियल–इन्टेलिजेंस' 'मशीनट्रांसलेशन' प्रभृतिकार्यार्थं सर्वाधिका उपयोगिन्यस्ति। ज्ञान–संस्काराभ्यां विश्वं समुन्नतं भवितुं शक्यते। शिक्षा मूल्यकेन्द्रिता भवेत्, यया छात्राः


शेषभागःअष्टमपुटे


## संस्कृत, जीवनोद्धेश्यानां प्राप्तये सहायकोऽस्ति-प्रो.भागीरथीनन्द

नवदेहली। भारतस्य प्राचीन, सांस्कृतिक, ऐतिहासिक, धार्मिक, आध्यात्मिक दार्शनिक, सामाजिक एवं राजनीतिक




जीवन विकासस्य समृद्धेः सम्पूर्ण व्याख्या संस्कृत साहित्ये वर्णितोऽस्ति। जीवनलक्ष्यानां प्राप्तये संस्कृत सहायको भवति। विचारोज्यं श्री ला.ब.शा.रा.सं विद्यापीठस्य साहित्य विभागाध्यक्ष प्रो. भागीरथीनन्द व्यक्तवान। प्रो. भागीरथीनन्द संस्कृतआकादमी माध्यमेनायोजित संस्कृत प्रतिभापुरस्कार वितरण समारोहे उक्तवान। अस्मिन्नवसरे मुख्यतिथि प्रो. देवीप्रसादत्रिपाठि उक्तवान यत् समस्त प्राचीन भाषाः एवं तासां साहित्ये संस्कृतस्य विशिष्ट स्थानमस्ति। विश्व संस्कृतभाषायाः वैज्ञानिक पक्षे कार्यः प्रचलति। संस्कृत विश्वस्य समस्त भाषानां मध्ये सेतु रुपे कार्यः करोति।

अस्मिन्नवसरे संस्कृत विद्यालमेषु अध्ययनशील 400 छात्रान् सम्मानितः अकरोत्।

## मानवाः भवन्तु- डॉ श्रेयांश द्विवेदी

वार्ताहरः प्रवीणः

सोनीपतनगरम् । ज्येष्ठ कृष्ण नवम्यां संवत् 2075 बुधवारे हरियाणा संस्कृत अकादमी पञ्चकूला द्वारा सैन- आदर्श –वरिष्ठ –माध्यमिक –विद्यालयः, आदर्श नगर, सोनीपतनगरे 'नगरे नगरे भगवद्गीता , जने जने संस्कारः' इति कार्यक्रमः समायोजितः। अस्मिन्नवसरे मुख्यवक्ता डॉ श्रेयांश द्विवेदी उपाध्यक्षः हरियाणा संस्कृत अकादमी पञ्चकूला आसीत्। स्वीयोद्बोधने तेन विद्यार्थिनःसम्बोधयन्



कथितं सत् यूयं मानवाः भवन्तु। यन्त्राणि न भवन्तु। तेन उभाभ्यां भेदःप्रकटयन् मानवाः भवन्तु इति सन्देशःदत्तः। तेन प्रोक्तं सत् साम्प्रतं भारत माता वाञ्छति विवेकानन्दं, दयानन्दं व शंकराचार्यं सदृशान् सुसंस्कृतान्। भवन्तः सर्वे सुसंस्कृताः नैतिकाः गुणिनो भवन्तु। गीतायाः वैशिष्ट्यं प्रतिपादयन् तेनोक्तं गीता नुसारं वयं आत्मनः मित्राणि शत्रवश्च। अतः वयं कर्त्तव्यपरायणो भूत्वा आत्मनो मित्राणि भवामः । अवसरेस्मिन् विद्यालयस्य संस्थापकाः श्रीमान् ईश्वर सिंहः स्वकीये सम्बोधने मुख्यातिथेः सम्माननं कुर्वन् ह परिचयं कारितवान्। अवसरेस्मिन् श्री प्रवीण जी प्राचार्यः श्रीमती सन्तोष, कीर्ति, राजबाला प्रभृतयः शिक्षकगणः उपस्थितः आसीत् ।

## उत्तर-दिनाजपुरे प्रवृत्तं सम्भाषणशिबिरम्

वार्ताहरः–बिक्रमसरकारः। गत 03–05–2018 दिनाङ्कात् 12–05–2018 दिनाङ्कं यावत् पश्चिमवङ्गराज्यस्य उत्तरदिनाजपुर जनपदस्य कुनोरः इत्याख्ये स्थाने संस्कृतभारती,उत्तरदिनाजपुरपक्षतः दशदिवसीयं संस्कृतसम्भाषणशिबिरं सञ्चालितम् । अस्मिन्



सम्भाषणशिबिरे पञ्चाशत् (50) छात्राः सश्रद्धं भागमगृह्णन् । शिबिरशिक्षकरूपेण रायगञ्जविश्वविद्यालयस्य संस्कृत-अनौपचारिकशिक्षकः श्री बिक्रमदाशः शिबिरमिदं सञ्चालितवान् । अस्य सम्भाषणशिबिरस्य समारोपकार्यक्रमः 12–05–2018 दिनाङ्के शनिवासरे भारतसेवाश्रम,कुनोरे अनुष्ठितोऽभवत् । समारोपकार्यक्रमेऽस्मिन् भारतसेवाश्रम,कुनोरस्य माहाराजा स्वामी ज्योतिर्मयानन्दजी महाराज सभापतित्वेन,मुख्यातिथित्वेन संस्कृताध्यापकः श्री मदनपालः,श्री कार्तिकचन्द्रपालः,मुख्यवक्तात्वेन च श्री बिकारमदाशः सभामलङ्कृतवन्तः। छात्रैः शिबिरानुभवकथनं,संस्कृतनाटकं,संस्कृतगीतञ्च परिवेषणं कृतवन्तः ।कार्यक्रमस्य सञ्चालने बिक्रमसरकारः,नेपालवर्मनः,भास्करघोषप्रमुखाः सर्वविधं सहकृतवन्तः।

# भारतीय संस्कृतेः संरक्षणे संस्कृतस्य योगदानं सर्वोपरि-नलिनी

नवदेहली। भारतीयं संस्कृतेराधारः संस्कृत भाषाऽस्ति। भारतीय संस्कृतेः संरक्षणे संस्कृतभाषायाः महत्वपूर्ण योगदानमस्ति। अहं भारतीय संस्कृति कथक नृत्य माध्यमेन विश्वे प्रसारयामि। सभ्यः तु वहु वर्तते। परञ्च सुसंस्कृतं सर्वेनास्ति। सुसंस्कृत सः एव भवितुं शक्यते यो संस्कृतं अवगच्छति। संस्कृत साहित्येषु अस्माकं कला एवं संस्कृतेः बहु महत्वमस्ति।

संस्कृत भाषानां कला एवं संस्कृतिषु रोजगारस्य विस्तृत क्षेत्रोस्ति।

अस्मिन्नवसरे कार्यक्रमस्य अध्यक्षता समये दिल्ली शिक्षानिदेशालयस्य पूर्व प्राचार्या वेदवती ढ़ीगरा उक्तवती यत् संस्कृतभाषा भारतस्य आत्मा अस्ति। विद्यालय, विश्वविद्यालय एवं महाविद्यालयतः प्रतिवर्ष अनेक आधुनिक विद्यालय, महाविद्यालय संस्कृत अध्यापनाय छात्रान् प्रेरयति।






विचारोऽयं दिल्लीसंस्कृतआकादमी माध्यमेन करोलबाग नवदेहली स्थित आयोजित संस्कृतप्रतिभापुरस्कार वितरण समारोहस्य मुख्यातिथि प्रसिद्ध कत्थक नृत्यांगना नलिनि व्यक्तवती। सा उक्तवती यत् अहं बनारसतः सम्बन्धितोऽस्मि। अद्य सम्मानित भवन्तः सर्वे छात्र-छात्राः अग्रे गत्वा कस्यापि क्षेत्रे गच्छतु परञ्च संस्कृतं स्व जीवने घृत्वा स्व जीवनं अग्रे सारयुत।

अस्मिन्नवसरे मोतिलालनेहरू महाविद्यालयस्य संस्कृतविभागाध्यक्ष डॉ. कौशलपंवार उक्तवान यत् संस्कृत भाषायाः विकास एवं तस्याः उपयोगिता संरक्षणाय सर्वे विद्यालय स्व महत्वपूर्ण योगदानं प्रददाति। अत्रैव संस्कृतस्य छात्र-छात्रा सम्पूर्ण प्रदेशे विश्वविद्यालय एवं महाविद्यालयेषु संस्कृत भाषा एकः विषयस्य रुपे अध्ययनं करोति।

# गीतां पठन्तु, सुसंस्कारिणो भवन्तु-डॉ श्रेयांशः

कुरुक्षेत्रम्। वार्ताहरः- सुशीलः। अद्य राजकीय-वरिष्ठ माध्यमिक-विद्यालयः, शरीफगढ, कुरुक्षेत्रे हरियाणा संस्कृत अकादमी पञ्चकूला द्वारा 'नगरे नगरे भगवद्गीता जने जने संस्कारः' इति श्रृंखलायाः आयोजनं कृतम्। कार्यक्रमे मुख्यवक्तृरूपेण डॉ श्रेयांश द्विवेदी उपाध्यक्षः हरियाणा संस्कृत अकादमी, पञ्चकूला स्वीयोद्बोधनेन विद्यार्थिनः सम्बोधिताः। डॉ द्विवेदिना गीतायाः मूल्यपरकं महत्त्वं सप्रमाणं प्रस्तुतम्। तेन सर्वे आत्मविकासाय सततम् उद्यमशीलाः भवन्तु इति प्रेरणा प्रदत्ता। अस्मिन्नवसरे मञ्चसञ्चालनं श्री सुशील कुमार कौशिकः संस्कृत-प्राध्यापकः कृतवान्। कार्यक्रमेस्मिन् मीनाक्षी, गीता,वन्दना कुलबीर , सतपाल,आशा देवी, प्रवीन कुमार, सुनीता, रेखा रानी , वीना कुमारी, सीमा गोयल, पिंकी देवी प्रभृतयः शिक्षाविद् उपस्थिताः आसन् ।



# डॉ. वाई.एन्. राव् वर्यस्य 'संस्कृत-पाठान् पठत' इति पाठ्यक्रमस्य चक्रम्-8 इत्यस्य आरम्भः अभवत्

हैदराबाद्। डॉ. वाई.एन्. राव्-वर्यः 80-वर्षीयः हैदराबाद्-नगरस्थः (तेलङ्गाणा राज्ये, भारते) लब्धप्रतिष्ठः भाषावैज्ञानिकः



अस्ति। सः षड्भ्यः वर्षेभ्यः देवभाषां - संस्कृतं पाठयन्नस्ति तदर्थम् अन्तर्जालमाध्यमेन 'संस्कृत-पाठान् पठत' इति आधारभूत-संस्कृत-पाठ्यक्रमं ई-मेल - द्वारा निश्शुल्कं चालयति च। डॉ. राव्-वर्यः पुदु' चेरीस्थस्य श्री-अरविन्द-भारतीयसंस्कृति-संस्थानस्य (साफिक्) पक्षतः उपर्युक्तपाठ्यक्रमं चालयति।

उपर्युक्तपाठ्यक्रमस्य सप्तचक्राणि सफलतया समाप्य सः 8-मस्य चक्रस्य 18-02-2018-दिनाङ्के प्रारम्भं कृतवान् अस्ति। अस्मिन् पाठ्यक्रमे 52 साप्ताहिकाः पाठाः भवन्ति। अस्मिन् पाठ्यक्रमे 2,500 छात्राः प्रवेशं प्राप्तवन्तः। तेषु 85 छात्राः आस्ट्रेलिया, दुबाई, जर्मनी, ओमन्, सौदीअरेबिया, स्विट्जर्लैण्ड्, यू.के., यू.एस्.ए., इत्यादि-विभिन्न-अन्य-देशेभ्यश्च सन्ति। अतीव रुचिकरविषयः तु विविधदेशेभ्यः, मातृभाषाभ्यः, धर्मेभ्यः, विश्वासेभ्यः च, 7-तः 87-पर्यन्त-वयस्काः च सन्ति अस्मिन् पाठ्यक्रमे।

यदा एषः 52-साप्ताहिक-पाठानां पाठ्यक्रमः समाप्तः भवति तदा अन्तर्जाल-माध्यमेन आन्-लाइन् वेब्-आधारित-परीक्षा भविष्यति। तस्यां परीक्षायाम् उत्तीर्णानां छात्राणां प्रतिभापाटवानुसारं श्रेण्यः दीयन्ते। श्री-अरविन्द-भारतीयसंस्कृति-संस्थानस्य (साफिक्) पक्षतः उत्तीर्ण 'छात्राणां प्रमाणपत्राणि दीयन्ते।

श्रीमान् जे.एस्. शास्त्री-वर्यः 62-वर्षीयः महाराष्ट्र वित्तकोशतः सेवानिवृत्तः सहायक-महानिदेशकः अस्मिन् पवित्र कार्ये डॉ. वाई.एन्. राव् महोदयेन साकं मिलित्वा निरन्तरं सहकारं कुर्वन् अस्ति।



# अवाचीन संस्कृत कवितायां स्रग्विणी छन्दः

स्वातन्त्र्योत्तर कविता अर्वाचीन संस्कृत कवितोत्यते। अर्वाचीन संस्कृत कवितायाः रूपद्वयमस्ति वृत्तात्मक गीतात्मकञ्च। स्रग्विणीवृत्तं वर्णवृत्तं जगती कोटेश्च वृत्तमिदमम्। तल्लक्षणं–''रैश्चतुर्भिर्युता स्रग्विणी सम्मता।'' उर्दूकवितायामस्य प्रयोगं मात्रिक छन्दसि प्राप्यते परञ्च मूलकः वृत्तमिदमस्ति वर्णवृत्तम्।

श्रीमदभागवतपुराणेऽनेकानेक स्तुतिषु चस्रग्विणी वृत्तं प्रयुक्तमासीत्। यथा–

उच्युतं केशवं रामनारायणं
कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं
जानकी नायकं रामचन्द्रं भजे।(अच्युतारटक पद्य 1)

स्वातन्त्र्योत्तर संस्कृत काव्यधारायां डॉ. कपिलदेव द्विवेदी महोदयेन राष्ट्रगीताञ्जलेरेकस्मिन् गीते 1960 तमेवर्षे स्रग्विणी छन्दः प्रयुक्तः। आचार्य रमेशचन्द्रशुकलेन 1978तमे वर्षे 'सुगमरामायणस्यान्ते स्रग्विणी वृत्तं प्रयुक्तम् यथा–

भासतां भारते संस्कृतं सन्ततं
राजतां राष्ट्रभक्तिर्नृणा मानसे।
घोततां सर्वदा श्री क्षमायां मुदा
वर्ततां राघवानुग्रहोऽस्मिञ्जने।।

(सुगम रामायणम् पृ. 216)

परम श्रद्धयेन डॉ.रमाकान्त शुक्ल महोदयेन विरचितस्य 'भाति मे भारतम्' काव्यस्य सर्वप्रथम वाचनं देववाणी–परिषदो द्वितीय वार्षिकऽधिवेशने खिष्टीयान्दके एकोन विंशत्युत्तर–नवसप्ततिवर्षस्य फरवरी मासस्य त्रयोदश दिनाँङ्के (13.02.1979) दिल्लीनगरस्य दिल्ली विश्वविद्यालयस्य अङ्गभूत–राजधानी महाविद्यालयस्य सभागारे काव्य गोष्ठयां जातम्। इतः पूर्वम् (डॉ.रमाकान्तशुक्लात्) कश्चिदपि कविः तादृशं सस्वरं सघोषं काव्यपाठं कर्तुं न श्रूयते सायतेवा। साम्प्रतं सत्यपि काव्ये स्रग्विणी छन्दसः तादृशं सघोषं गायनं दर्शकसमूहेन पुनरावृत्तिपूर्वकं भूयोभूयो श्रवणमत्यद्भुतमेवासीत्। ततः प्रभृतिः काव्यमिदं सर्वत्र सम्मेलनेषु कविषु कृतेस्वपि बहुषु नवीन काव्य पाठेषु श्रवणमस्य कामयन्ते वारं-वारं सभाजन-सदस्या बहुमानेन।

तदन्तरं काव्यमिदम् आकाशवाणी माध्यमेन दूरदर्शन माध्यमेन च रसिकेषु लोकप्रियत्व माजगाम। सर्वे नूतनाः काव्यधर्मिणः प्रभाविताऽनेन छन्दसा स्वरचनास्वपि सर्वत्र प्रमुखप्रदाताोऽभवना छन्दएतत् केवलं भक्तोः श्रृंगारस्य वाडभि व्यक्तिकरं मासीत् किन्तु लोक प्रियत्वेन विभिन्नरसानां भावानां च माधुर्यस्य व्यञ्जकत्वमगच्छत्। विगतेषु दशक चत्वारेषु वर्षेषु छन्दसि स्रग्विण्यां कात्यानां शताधिकानां रचना विभिन्न विषयानधिकृत्य रचिता दृश्यन्ते, प्रकाशिताश्च।

अहो काव्यपाठेषु गोष्ठीषु च कवयोऽपि 'भाति मे भारतम' इव पठन्तोऽपि विलोक्यन्ते। तेन निश्चितमेवे भाति यत् स्रग्विणी छन्दो राष्ट्रीय भावनायाः समुद्घोषकं प्रतिष्ठितम्। डॉ. इच्छारामद्विवेदमहाभागेन 'स्रग्विणी' वृत्तस्य प्रयोग विषये अलिखत–

'भाति मे भारतम्' ने संस्कृत साहित्य जगत में एक कीर्तिमान स्थापित कर दिया है। इस रचना से प्रभावित होकर बहुत–सी रचनाएं 'स्रग्विणी' छन्द में लिखी गयी। आपको मैनपुरी के संस्कृत कवि सम्मेलन के मञ्च पर 'अभिराज' राजेन्द्र मिश्र ने 'स्रग्विणीराजराज' विशेषण से विभूषित किया। (भाति मे भारतम् डॉ. रमाकान्त शुक्ल अष्टम छात्र संस्करण पृष्ठ 98) 1979 तमे ईसवीय वर्षे डॉ. रमाकान्त शुक्लेन रचितं काव्यं 'भाति मे भारतम्' तामधेयं कात्यस्य प्रथम पाठ राजधानी महाविद्यालयस्य सभागारे (13.2.1979) देववाणी परिषद् दिल्ली नगरस्य द्वितीय वार्षिकाधिवेशने श्रुत्वा डॉ. वासुदेवकृष्ण चतुर्वेदिना–'भारतं भारतं नैमि भूतिप्रदम्' रचना स्रग्विणी वृत्ते कृता। यतः रमाकान्तशुक्लेन 'भाति में भारतम्' रचना स्रग्विणी छन्दसि कृता ततः अद्यावधिः स्रग्विणी छन्दः प्रतिष्ठापदं लभते। क्षेमेन्द्र (1050 ई.) वर्षस्यानुसरणं कुर्वन्तः यदि कोऽपि आचार्यः छन्दः सु चिन्तयिष्यति तदा स्रग्विणी वृत्तस्य महत्त्वं स्वीकरिष्यति। 'भाति में भारतम्' अतोऽनन्तरमनेक रचना कारै स्रग्विणी छन्दसि राष्ट्रीय भावनानामपि त्यक्त कर्तृकाणां रचनानां संख्या शताधि काः वर्तते।

डॉ. चन्दन लाल पारासरेण डॉ. रमाकान्त शुक्लस्य 'भाति में भारतम्' काव्यं वीक्ष्य उत्तरमङ्गलस्य गर्जनयोद्बुद्ध्य 'मगल भारत' नाम की रचना स्रग्विणी वृन्ते कृता यथा–

वेशभूषा विभिन्नं विभन्नं मतं
भिन्नभाषारूचिः सौरभं संस्कृतम्।
भिन्नतायां समानैकता भारते
विश्व बन्धुत्व भावः सदा शोभते।।
दीप्तिदं रीतिदं गीतिदं भारतम्।

(मगलंभारतम् 48 पृष्ठ 24)

डॉ.उपेन्द्र पाण्डेयस्य 'राष्ट्रगौरवम्', डॉ.हर्षदेव माधवस्य प्रतिकास्यं 'भाति ते भारतम', स्पष्टरूपेण भाति मे भारतम् एव वर्धते। प्रस्तुत पत्रे लेखकस्य दृष्टयां 'भाति मे भारतम्' अतोऽनन्तरमनेकाः रचनाः आगताः येषु स्रग्विणी छन्दः प्रयुक्तमासीत्। भारतीय संस्कृतिः, संस्कृत भाषा, भारतीयता, भारतीयादि विषयेषु काव्य कारैः स्व विचाराः प्रकटिताः। रचनानां शीर्ष केषु भूतले, या भाति या भारतम् या संस्कृति पदेषु कस्चिदेकं पदमवश्यामेवागमिष्यति। इयं शीर्षक योजनाघुणाक्षरन्यायेन न सिध्यति अपितु' भाति में भारतम्', इत्यस्य गर्जनया एव संस्पृष्ट मस्ति। यथा मेघदूतस्य परवर्ती सन्देश काव्येषु मन्दाक्रान्ता छन्दः प्रयुक्तमासीत, प्रेमाख्यानेषु दोहा- चौपाई इत्यादीनां प्रयोगरनेकवर्षणि योवदासीत् तथैव 1980 ईसवीयवर्षानन्तरं राष्ट्रप्रेम, राष्ट्रगौरव, संस्कृति गौरव, वैयक्तिकभावनानां प्रकाशानाय स्रग्विणी छन्दः प्रयुक्त मासीत्।

अस्य प्रधानं पुष्टञ्च कारणमिदमस्ति–डॉ.रमाकान्त शुक्ल महोदयस्य विशिष्टचारूत्वेन सह मेघ गम्भीरघोषे उच्चारित स्रग्विणी पाठः वर्तते। यत् तेषां वाचा सहस्रथा देशविदेशस्य मञ्चैः श्रुतम् यत् किशोर तरुण-प्रौढ़ कवीनां मनोमस्तिकेषु स्वप्रभविष्णोरनुरगर्जनायाः प्रभावं जहाति यतः ते श्रोतारः काव्यकर्त्ताः मर्मज्ञा कवयः वा स्वकाव्यमपि स्रग्विणी छन्दसि कर्त्तुमुद्यताः भवन्ति। डॉ. शुक्ल महोदयस्य स्रग्विणी पाठः आकाशवाण्या दूरदर्शनमाध्यमेन चानेक कोटिजनैराकर्णितम् यस्य लाभः ततद् रचनाकारैः गृहीतम् यैः साक्षात् कविगोष्ठीषु सम्मेलनेषु न श्रुतम्। यथार्थमिदमस्ति यत् विगतचत्वारदशकस्य कालः संस्कृत कवितायाः स्रग्विणी युगमेवास्ति।

-डॉ. दुर्गाप्रसाद सिंह
ई-1/250, स्ट्रीट नं. 5, नेहरू विहार
दिल्ली-110094
मो.9968151935

# वासुदेवदण्डकम्

–डॉ अरविन्दकुमारतिवारी
arvindt490@gmail.com

(इदं काश्याः प्रथितविदुषः श्रीमतः सार्वभौमसंस्कृतप्रचारसंस्थानस्य संस्थापकवर्यस्य आचार्यवासुदेवद्विवेदिशास्त्रिगुरुवरस्य कृतज्ञशिष्येण विरचितं सहृदयहृदयहरणं कुर्यादिति कामये।)

सद्गुरवे श्रीगुरुवरवासुदेवद्विवेदिशास्त्रिणे नमः।

गुञ्जेत् सदा संस्कृतम्यवाणी
वीथ्यां वने मङ्गलभव्यपाणिः।
सर्वत्र वन्द्या प्रसरेद् विचिन्त्य
ययौ गुरुर्मे भुवि वासुदेवः।।

धातुरूपं करे यस्य शब्दरूपं मुखे सदा।
वाक्यसंग्रहपाणिं तं वासुदेवं नमाम्यहम्।।

जयतु जयतु भाष्यतां भारतीयैर्हृदा देववाणी शुभा भारती सौख्यदा हारिणी।
विलसतु भुवि सर्ववेदात्मिका सर्वविज्ञानदा भुक्तिमुक्तिप्रदा सिद्धिदाकांक्षिणी।
विहरतु हृदि नाट्यगीतोक्तियोगादिविद्यालया भूतिदा मोददा मानसोल्लासिनी।
प्रसरतु दिशि कामये रक्ष्यतां वासुदेवोक्तिभिः सर्वजिह्वांगता सा शुभोद्भाविनी। 1
विचरतु मयि जीवनं चार्पितं येन विद्वन्मणीन्द्रादिसेव्येन सर्व सता भास्वता।
नमत सपदि सादरं तं गुरुं पुष्पगुच्छैः समोदं द्विवेदं श्रुतं शाश्वतं कोविदम्।
विबुधसुजनवन्द्यमानं बुधं वासुदेवं जगद्भास्करं काशिकं क्रान्तदर्शीश्वरम्।
निखिलवटुकसेवनीयं शिवं शिष्यचित्ताश्रयं यष्टिपाणिं मुदालौकिकं वन्दितम्। 2
धवलनवलधौतवस्त्रं कटौ श्रीशरीरे नवं कंचुकं निर्मलं यस्य तं नौम्यहम्।
प्रणतमनुजजीवनं तद् हृदाकारि लोके मनोहारि तं सद्गुरुं देवतुल्यं नुमः।
विततभुवनकीर्तितं तं कष्पालुं गुरुं प्राप्य मूढोऽरविन्दो गतो विश्रुतिं श्रूयते।
कुसुमनिकरवर्षणैः श्रीगुरुं वासुदेवं सदा सेव्यपादं श्रये शिष्यकः प्रांजलिः। 3
सरतु सरतु सार्वभौमे श्रुतं सार्वभौमं लसत्संस्कृतज्ञास्पदं सुस्थलं पावनम्।
जनबुधमुनितीर्थभूतं शुभं संस्मरामो वयं साम्प्रतं हे बुधाः पुण्यदं सर्वदम्।
हृदि हृदि ननु काशतां विश्रुतं गीस्स्वरैर्वेदमन्त्राक्षरैर्मोहकं वित्तदं शान्तिदं
विबुधसदसि भावये सद्गुरोः कीतिरूपं विशालं गष्हं तत्स्थलं सार्वभौमं ध्रुवम्। 4

अमरवाणी विजयताम्।




**पाठकानां कृते सूचनाः–**

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्–

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# सम्पादकीयम्

भारतीयैकतासाधकं संस्कृतं
भारतीयत्वसम्पादकं संस्कृतम्
ज्ञानपुंजप्रभादर्शकं संस्कृतं
सर्वदानन्दसन्दोहदं संस्कृतम्।।

इति समुद्घोषकाणां वन्दनीयचरणानाम् आचार्यवासुदेवद्विवेदिशास्त्रिमहोदयानां वचनं प्रतिजनं प्रतिमार्गमधुना संश्रूयते। हन्त! प्रवर्धते संस्कृतमिति जानाति सर्वोऽपि लोकः। सद्य एव दूरदर्शने प्रसार्यमाणा वार्तावली सार्धशतं प्रसारणं पूर्णं कष्टवती। देशे सर्वत्र संस्कृतविषयक उल्लासः दृष्टिपथमायातः। सर्वकारोऽपि संस्कृतसेवनाय बद्धपरिकरो विलोक्यते। अस्मिन् स्वर्णिमसमये विदुषां दायित्वमस्ति यत् सर्वमपि कार्यमपहाय संस्कृतसंवर्धनार्थं यत्नो विधेयः। दृश्यन्ते बहवो विद्वांसो यैः संस्कृतस्य महान् प्रचारः कर्तुं शक्यते। अतः कालोऽयं तानेव प्रतीक्षते। एतावत् प्रतीयते यत् तद् दिनं न दूरं यस्मिन् दिने सर्वत्र संस्कृतध्वनिरेव श्रोष्यते।

सुधियः! आमुखपटले संस्कृतप्रचाराय यादृश उत्साहो विलोक्यते स तु प्रशंसनीयो वर्तते। डॉ चन्द्रकान्तशुक्लेन संस्कृतच्छन्दोगानस्पर्द्धा या कारिता तत्र च दशदिवसीयः छन्दोव्याख्यानं च यत्कारितं तत्सर्वमपि सर्वे दृष्टवन्त एव।

डॉ चन्द्रकान्तशुक्लेन संस्कृतच्छन्दोगानस्पर्द्धा या कारिता तत्र च दशदिवसीयः छन्दोव्याख्यानं च यत्कारितं तत्सर्वमपि सर्वे दृष्टवन्त एव। अनेन संस्कृते निहितानां वृष्टानां छन्दसां स्वरो लयो भेदः लक्षणानि च सवैरपि श्रुतानि। हन्त! अतीव सुन्दरोऽवरोऽयमासीत्। भूरिशो वर्धापनानि लब्धानि तैः। बहुषु वर्ष्देषु संस्कृतं भारतं प्रभृतिषु संस्कृतं विभ्राजमानमस्ति। कवयोऽमी पद्यरचनसमूहे कलायतनम् अन्यत्र च तपस्विकविभिः कविपितामहैः डॉ महेशझापस्तनमहोदयैः डॉ सुदिप्तनन्दामहोदयैः सुकविः डॉ शंकरराजारमणेन डॉ अरविन्दकुमारतिवारिणा डॉ संजयचौबे श्रीपंकजझा अन्यैश्च विश्रुतकविभिः स्वसंस्कृतकाव्यप्रणयनेन राजमानं संस्कृतं शीघ्रमेव सर्वेषां हृदि विशद् वर्तते।

मान्याः! देशे भारतीयतासंरक्षणाय संस्कृतमेव वरमस्तीति ज्ञातवास्माभिः विज्ञानेन सहास्य संवर्धनं करणीयमस्ति। अस्तु संस्कृतोत्थानं कामयमानाहं संस्कृतसंवादपक्षतः सर्वेभ्यो वर्धापनानि समर्पयन्ती भगवतीं शारदामनतोऽस्मि।

अमरवाणी विजयताम्।

## वेदामृतम्

( ऋग्वेदभाष्यम् )

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

[११] अथास्याष्टर्चस्यैकादशसूक्तस्य जेता माधुच्छन्दस ऋषिः। इन्द्रो देवता। अनुष्टुप् छन्दः। गान्धारः स्वरः।।

अब ग्यारहवें सूक्त का आरम्भ, किया जाता है तथा पहले मन्त्र। में इन्द्र शब्द से ईश्वर वा विजय करनेवाले
पुरुष का उपदेश किया है–

**इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः।**
**रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥१॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। सब वेदवाणी परमैश्वर्ययुक्त, सब में रहने, सब जगह रमण करने, सत्य स्वभाव तथा धर्मात्मा सज्जनों को विजय देनेवाले परमेश्वर और धर्म वा बल से दुष्ट मनुष्यों को जीतने तथा धर्मात्मा वा सज्जन पुरुषों की रक्षा करनेवाले मनुष्य का प्रकाश करती हैं। इस प्रकार परमेश्वर वेदवाणी से सब मनुष्यों को आज्ञा देता है।।१।।

**सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते।**
**त्वामभि प्र णोनुमो जेतारमपराजितम्॥२॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य परमेश्वर की आज्ञा के पालने वा अपने धर्मानुष्ठान से परमात्मा तथा शूरवीर आदि मनुष्यों में मित्रभाव, अर्थात् प्रीति रखते हैं, वे बलवाले होकर किसी मनुष्य से पराजय वा भय को प्राप्त कभी नहीं होते।।2।।

**पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः।**
**यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मुघम्॥३॥**

अर्थ-इस मन्त्र में भी श्लेषालङ्कार है। जैसे ईश्वर वा राजा की इस संसार में दान और रक्षा निश्चल न्याययुक्त होती हैं, वैसे अन्य मनुष्यों को भी प्रजा के बीच में विद्या
और निर्भयता का निरन्तर विस्तार करना चाहिए। जो ईश्वर न होता तो यह जगत् कैसे उत्पन्न होता? तथा जो द्य ईश्वर सब पदार्थो को उत्पन्न करके सब मनुष्यों के लिए नहीं देता तो मनुष्य लोग कैसे जी सकते? इससे सब कार्यों का उत्पन्न करने और सब सुखों का देनेवाला ईश्वर ही है, अन्य कोई नहीं, यह बात सबको माननी चाहिए।।3।।

फिर अगले मन्त्र में इन्द्र शब्द से सूर्य और सेनापति के गुणों का उपदेश किया है–

# "संस्कृत वाङ्मये वर्णित–नाट्यशास्त्रस्योपगिता"

डा. छोटी बाई मीणा
सहायकाचार्यः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

नाट्यशास्त्र–भरतमुनिना प्रणीतसंस्कृतसाहित्यस्य अद्वितीयं कलाकोषमस्ति। नाट्यशास्त्रस्य रचनायाः समय ईषा 400 चतुर्थः शताब्दी अस्ति। परं प्रत्येक दशायां भरतः कालिदासात् पूर्व–साहित्ये नाट्ये च विधिवत् रूपेण अभवत्। विक्रमोर्वशीयम् नाटके कालिदासः अकथयत्–

मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयः प्रयुक्तः।
ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः सलोकपालः।।[1]

भरतस्य उल्लेखः सर्वप्रथमं दशरथपुत्ररूपेण प्राप्यते। महाभारतेऽपि भरतस्य उल्लेखं वर्तते।

नाट्यशास्त्रस्य संपादकः रामकृष्णः प्रायः चत्वारिशंत् प्रतीनां परीक्षणं अकरोत्। उक्तं च–

एवं द्वादश–सहस्त्रैः श्लोकैरेकं तदर्धतः
षड्भिः श्लोकसहस्त्रैर्यो नाट्य वेदस्य संग्रहः।[2]

भावप्रकाशनस्य अध्ययनं कृते सति भरतः नाट्यशास्त्रविषयकः इयं समस्या कठिनतरः भवति। यतोहि शारदातनय मतानुसारेण भरतनाम विषये कुत्रापि उल्लेखं नास्ति। उक्तं च–

भाषावर्णोपकरणैः नानाप्रकृतिसंभवम्।
वेषं वयः कर्म चेष्टा विभ्रद भरत उच्यते।।[3]

नाट्यशास्त्रस्य संस्करणं लघुत्तमं वर्तते यस्मिन् संस्करणे 6000 श्लोकाः सन्ति। नाट्यशास्त्रे षट्त्रिंशत् अध्यायाः सन्ति। परं निर्णयसागर–प्रेसेन प्रकाशित–संस्करणे अध्यायानां संख्याः सप्तत्रिंशत् एव मन्यते। अभिनवगुप्तस्य अभिनवभारती टीकायां 36 अध्यायानाम् एव वर्णनमस्ति।

नाट्यशास्त्रस्य विषयवस्तु अध्यायेषु वर्णित अस्ति। अर्थात् नाट्यशास्त्रस्य प्रथमाध्याये ब्रह्मणः नाट्यस्य उत्पत्तिविषयस्य विस्ताररूपेण वर्णनमस्ति। द्वितीयेऽध्याये प्रेक्षागृहाणां वास्तुकलायाः विषये वर्णनमस्ति। तृतीयाध्याये रंगदेवतायाः पूजायाः प्रक्रियायाः वर्णनमस्ति। चतुर्थः अध्याये शिवताण्डवस्य लक्षणेन सह विस्तृतरूपेण विवेचनम् अकरोत्। अस्मिन् 108 कारणैः 32 अंगहारैः च भाव–नृत्यस्य दशानां वर्णनं क्रियते। पंचमाध्याये काव्यं, नाट्यं, संगीतादि कलानां प्राणभूतरसानां व्याख्या वर्तते। सप्तमाध्याये रसस्य विषये उल्लेखं वर्तते। भरतमतानुसारेण विभावानुभावव्यभिचारी संयोगात् रसस्य निष्पत्ति भवति। नाट्यशास्त्रस्य द्वादशः अध्यायस्य नाम मण्डल–विधानमस्ति।

भरतात् पूर्वेऽपि नाट्यस्य विषये भरतः कथयति यत्–तस्माल्लोकप्रमाणं हि विज्ञेयं नाट्यम्।[4]

ग्रन्थस्य समाप्तिकालेऽपि भरतः भरतवाक्ये कथयति यत्–

न प्रोक्तं यच्च लोकादनुकृतिकरणं तच्च कार्यं विधिज्ञैः[5]

अर्थात् लोक परम्परायामेव नाट्यस्य प्रवलं प्रमाणं वर्तते।

सर्वप्रथमं पाणिनिः एव नटसूत्राणाम् उल्लेख अष्टाध्यायी मध्ये अकरोत्–उक्तं च–पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः तथापि कर्मन्दकृशाश्ववादिनि"

भरतस्य नाट्यशास्त्रस्य सर्वाधिकप्रभावः तत्कालीन समाजे एव अस्ति। समाजे प्रचलित मनीषिणां चिन्तकानां, कवीनां, शिल्पीनां संगीतज्ञानां च महापुरुषैः, सह नृपाणां अपि वर्णनमस्ति।

भरतप्रणीतनाट्यशास्त्र सर्वाः कला विद्या च सम्पूर्ण ज्ञानात् कर्मात् च समन्वितं भूत्वा अद्यापि सर्वैः जनानां मनांसि आकर्षितं करोति। उक्तं च–

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।[6]
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।

अर्थात् भरतमतानुसारेण अस्याः रचनायाः प्रमुखम् उद्देश्यं शूद्रवर्णनेन सह नारीणां कृतेऽपि उपयोगी पठन–पाठन योग्यं वर्तते। भरतमतानुसारेण कलायाः पदात् गीतं, वाद्यं, नृत्यादि अर्थ ग्रहीयते परं वर्तमान समये अस्याः कलायाः व्यापकरूपेण प्रयोगं भवति। यतोहि नाट्यशास्त्रे काचित् एका कलायाः वर्णनं नास्ति परं तत्र तु विभिन्नकलानां प्रयोगम् अभवत्। भरतमतानुसारेण कलायाः अर्थः भवति यत् "कम लाति या सा कला" अर्थात् यस्याः कलायाः माध्यमेन वयम् आनन्दस्य अनुभवं कुर्मः तर्हि सैव कला भवति। यतोहि कला शब्दः कल्+कच्+टाप् इति प्रत्ययात् निष्पनं भवति। शास्त्रेषु चतुष्षष्टिः कलानां वर्णनमस्ति।

प्राचीनमते सा कला अस्ति यत् भोगे विश्रान्तं न भवति उक्तं च–

विश्रान्तिर्यस्याः सम्भोगे सा कला न कला मता।
लीयते परमानन्दे ययात्मा सा परा कला।।

वर्तमानसमये या अभिनयकला अस्ति तस्याः कलायाः आधारः भरतप्रणीतनाट्यशास्त्रमेव अस्ति। भरतमानुसारेण अभिनय इति कस्मात्? अर्थात् अभीव्युपसर्गो णीञ् प्रापणार्थो धातुः। यस्मात् प्रयोगंनयति तस्मादभिनयः स्मृतः।

भरतमतानुसारेण अभिनय आंगिकं, वाचिकं, सात्विकम् आहार्यं च भवति। परं भोजः मतानुसारेण अभिनयस्य षट् भेदाः सन्ति। एतत् विषये अभिन्नगुप्तः कथयति यत् तेन सर्वेषु अभिनयेषु यद्रूपमवशिष्टं पूर्वैनोक्तम् अवश्यं च वक्तव्यं च कविनट शिक्षार्थ तद्येनाध्यायेनाभिधीयते सः सामान्याभिनयः।[7]

भरतमतानुसारेण सामान्याभिनयो नाम ज्ञेयो वागंग सत्वजः। उक्तं च–

शिरोवक्षकदयक्षोजंघोरुकरणेषु यत्
समः कर्मविभागो यः सामान्याभिनयस्तु सः।[8]

भरतः नृत्यकलायामपि नाटकस्य एकम् अनिवार्याङ्गं स्वीकरोति। भरतस्य समये संगीतस्यार्थः गीतं वाद्यं नृत्यं च तिसृणां कलानां समाहारेव आसीत्। परं वर्तमानसमये इमे कलाः पृथक–पृथक रूपेषु विभक्ताः सन्ति।

नृत्यकला संगीतस्य अभिनयस्य च गर्भात् निसृत्य पूर्वमेव स्वरूपे पृथकरूपेण प्रकटम् अभवत्। दशरूपकस्य प्रथमप्रकाशे धनञ्जयः कथयति यत्– अन्यद्भावाश्रयं नृत्यम्। अतः एतस्य सूत्रस्य व्याख्या कुर्वन् धनिकः कथयति यत्–

रसाश्रयान्नाट्याद् भावाश्रयं नृत्यमन्यदेव। तत्र भावाश्रयमिति विषयभेदान्नृत्यमिति। अर्थात् नाट्य रसम् उपरि आधारितं भवति। परं नृत्य सर्वदा भावाश्रित एव भवति। अतः नाट्यात् रसः भिन्नं भवति।

प्रायः जनाः कथयन्ति यत् संगीतकलायाः विशाल परम्परायाः विकासः उद्भवं च ब्रह्मणः शिवस्य ठक्कया एव अभवत्। संगीतस्य शास्त्रीयपरम्परा वैदिककालात् एव भारतेऽस्ति यतोहि सामवेदस्य सर्वत्र उल्लेखः गीतसंगीतस्य क्षेत्रेऽपि अकरोत्। नाट्यशास्त्रस्य पूर्वमेव अर्थात् भरतात् पूर्व संगीत कलायाः विकास पर्याप्त मात्रायाम् अभवत्। नाट्यशास्त्रे संगीतस्य महत्वं स्पष्टं कुर्वन् भरतः कथयति यत्–

यथावर्णादृते चित्रं न शोभाजननं भवेत्[9]
एवमेव विना गीतं नाट्यं रागं न गच्छति।

अर्थात् येन प्रकारेण चित्रस्य कल्पना विविधैः वर्णैः विना न भवति तेनैव प्रकारेण नाट्य रागस्य सृजनं गीतं विना न भवति। अन्य कलानाम् इव संगीतस्यापि आत्मा रसेव भवति। अतः यदा संगीतस्य प्रस्तुति सम्यक् रीत्या प्रस्तुतं भवति तर्हि स्त्री पुरुषानाम् इव पशु–पक्षिणां हृदयमपि प्रसन्नं भवति।

परं सगीतस्य कृते महत्वपूर्णं तत्वं भवति नाद। यतोहि नादं विना संगीते रूचिं न भवति उक्तं च–

न नादेन विना गीतं न नादेन विना स्वरः[10]
न नादेन विना नृत्तं तस्मान्नादात्मकं जगत्।।

अर्थात् येन प्रकारेण मृतपिण्डादि माध्यमेन घटकार्यम् उत्पन्नं भवति तैनेव प्रकारेण श्रुतिनां माध्यमेन सप्तः स्वराणां व्यजनं भवति। भरतः कथयति यत् यथा काव्ये नाटके च विभाव, अनुभावं, व्यभिचारीभावस्य संयोगात् स्थायी भावेन सह रसस्य उत्पत्तिः भवति तथैव संगीतेऽपि संवादी स्वरम्, उद्दीपन विभावस्य कार्यं करोति। अतः स्थायी स्वराः एव रसरूपे परिणतं भूत्वा आनन्दस्य संचरनां कुर्वन्ति। अतः भरतमतानुसारेण संगीतकलापि ररस्य व्यजकं भवति। यतोहि संगीतकलायाः काव्यकलायाः च घनिष्ठं सम्बन्धं भवति। काव्यकलायाः विकासः संस्कृतसाहित्ये निरन्तरम् अभवत्।

शेषभागःषष्टमपुटे

।।श्रीः।।

# रक्षणीया कन्या पाठनीया कन्या

## (लघुसंस्कृतनाटिका)

-डॉ.सन्नीकुमारः
वेदाचार्यः
राजकीयसंस्कष्टतमहाविद्यालय-नाहनम्
सिरमौरः, हि.प्र.

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता ।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफला क्रियाः ॥**

स्त्रीभिर्विना समाजस्य परिकल्पना एव नास्ति। तथापि अद्यत्वे स्त्रीणां कृते समाजे समोचितं सम्मानस्य भावं न दृश्यते। पुत्रस्य अपेक्षया कन्यायाः उत्पत्तिः समीचीना नैव मन्यते। केषुचित् परिवारेषु बालिकानां कृते समोचितं सम्मानं शिक्षाव्यवस्थाश्चादयः प्रदीयन्ते, तथापि इदानीं पर्यन्तं समाजे पुत्रस्य पुत्र्याश्च समतुल्यता नैव दृश्यते। अस्मिन् विषये एव पश्यन्तु लघुनाटिकामिमाम् -

**( प्रथमदृश्यः )**

सूत्रधारः-धनीरामनामकः कश्चिद् वणिक् आसीत् । तस्य पत्न्याः नाम रोशनी आसीत् । तयोः एका पुत्री निशा एकश्च पुत्रः सौरभः आसीत् । एकस्मिन् दिने सः धनीरामः आपणात् गृहमागत्य पत्न्या सह वार्तालापं करोति ।

(धनीरामः प्रविशति)

धनीरामः-(गृहमागत्य उपविश्य) भो रोशनी! कुत्र अस्ति? जलमानयतु?।

रोशनी-आनीतवती स्वामी! जलं पिवतु ।

धनीरामः-(जलं पीत्वा) मम प्रियः पुत्रः सौरभः कुत्र अस्ति?

रोशनी-स तु क्रीडन् आसीत् । भवन्तम् आगच्छन्तं दृष्ट्वा इदानीं पुस्तकं स्वीकृत्य उपविष्टः।

धनीरामः-(विहस्य) चिन्ता मास्तु । पुत्री निशा किं करोति?

रोशनी-निशा पठति ।

धनीरामः - (सक्रोधम्) पठति निशा पठित्वा किं करिष्यति तां गृहकार्यादिकं शिक्षयतु ।
श्वसुरालयं गत्वा तदेव तु करणीयं तया । अध्ययनेन तस्याः किं प्रयोजनम् ।

रोशनी - (विनम्रतया)स्वामी! पठित्वा सा आत्मनिर्भरा भविष्यति । सा अध्ययने उत्तमा अस्ति । गतकक्षायां सा प्रथमस्थानं प्राप्तवती ।

धनीरामः - (सक्षोभम्) न श्रृणोतुमिच्छामि अहम् एतत्सर्वम् । अहं केवलं प्रियपुत्रं सौरभमेव पाठयितुम् इच्छामि।

रोशनी - परञ्च स्वामी! सौरभेण समं निशा अपि पठतु काऽस्ति अत्र चिन्ता?

धनीरामः -(पुनः सक्रोधम्) चिन्ता चिन्ता कथं नास्ति निशायाः अध्ययने धनव्ययः तु भविष्यति एव । पुनः तस्याः विवाहे अपि धनव्ययः भविष्यति ।

रोशनी - एतदेव कारणमस्ति किम्?

धनीरामः - अथ किम् । निशायाः अपेक्षया पुत्रस्य कृते उच्चशिक्षां प्रदास्यामि । पुत्रस्य कृते एव धनसञ्चयं करिष्यामि । स एव अस्माकं वृद्धावस्थायां सहायको भविष्यति।

रोशनी-पुत्रस्य कृते अस्माकं पार्श्वे पर्याप्ताः धनसम्पत्यः सन्ति।

धनीरामः - तथापि कन्यायाः अध्ययनादिषु धनव्ययः व्यर्थमेव यतोहि-'अर्थो हि कन्या परकीय एव'। अतश्च अहं शीघ्रातिशीघ्रं पुत्र्याः निशायाः विवाहं कारयिष्यामि।

रोशनी - (सानुरोधम्) स्वामी! नैवं युक्तम् । पुत्र्याः विवाहे शीघ्रता मा करोतु। पाठयतु प्रथमं ताम्।

धनीरामः - नैवम् । यथाशीध्रमहं तस्याः विवाहं कारयामि तदैव अहं कन्याभारविमुक्तो भविष्यामि। अतश्च श्वः एव पुरोहितं पृष्ट्वा कश्चिद् सम्यक् गृहे पुत्र्याः विवाहं कारयिष्यामि। इदानीं भवती अपि गच्छतु भोजनव्यवस्थां पश्यतु, अहं तावत् विश्रामं करोमि । (सर्वे निष्क्रान्ताः)

**( द्वितीयदृश्यः )**

सूत्रधारः - धनीरामः स्वपुत्र्याः विवाहं कश्चिद् सोहनलालनामकेन वणिकः पुत्रेणेव कारयति ।

(अत्र प्रविशति रूदन्ती निशा तस्याश्च च पतिः सोहनलालः)

सोहनलालः - अयि सौभाग्यवति! किमर्थं रोदिति भवती?

निशा - (रूदन्ती)कुतः सौभाग्यवती?मन्दभागिनी अहम् ।

सोहनलालः - किमर्थमेवं भणसि?

निशा - अथ किम् अल्पवयसि विवाहिता । अहं पठितुमिच्छामि स्म परञ्च पित्रा नैव अध्यापिता।

सोहनलालः -(साश्चर्यम्) भवती पठितुमिच्छति किम्?

निशा - (अश्रून् संमृज्य) आम्, अहं पठित्वा सर्वकारीय-सेवासु अधिकारिणी भवितुमिच्छामि स्म। मम मातुः अपि अभिलाषा आसीत्, यदहं पठित्वा आत्मनिर्भरा भवेयम्।

सोहनलालः - अतिशोभनं चिन्तनमेतत्। अहमपि उच्चशिक्षां प्राप्तुमिच्छामि स्म परञ्च मम पितुः
मृत्योः पश्चात् आजीविकार्थं पितुः व्यवसायः मया स्वीकृतः।

निशा- दुर्भाग्यमस्त्येतत् आवयोः।

सोहनलालः - (विचिन्त्य) आसीत् दुर्भाग्यम्। परञ्च इदानीमेकः उपायः मम मनसि वर्तते।

निशा- (साश्चर्यम्) तत् किम्?

सोहनलालः - अहं गृहैव भवत्याः अध्ययनव्यवस्थां कर्तुं शक्नोमि। भवती गृहकार्यं सम्पाद्य पठितुं शक्नोति ।

निशा - (सहर्षम्) एवं भवितुं शक्नोति चेत् मत्कृते महदुपकाराय एतत् । अहं सम्यक्तया अध्ययनं करिष्यामि ।

सोहनलालः - तथा च यदि मम अर्धाङ्गिनी शिक्षिता भविष्यति तदा मम अध्ययनस्य अभिलाषा अपि पूर्णा भविष्यति, इत्यहं मन्ये ।

निशा-अतिशोभनम् स्वामी! एवं करिष्यावः । आगच्छतु इदानीं भोजनसमयः सञ्जातः ।

( उभौ निष्क्रान्तौ )

**( तृतीयदृश्यः )**

सूत्रधारः - अनेन प्रकारेण सोहनलालः निशायाः अध्ययनव्यस्थां कारयति तथा च निशा च उच्चशिक्षां संप्राप्य सर्वकारीयसेवासु उच्चाधिकारिण्याः पदस्य कृते परीक्षां दत्तवती । अद्य तस्याः परीक्षापरिणामः आगतः ।

(अत्र प्रविशति ससमाचारपत्रहस्तः सोहनलालः)

सोहनलालः - (उपविश्य, समाचारपत्रं पठित्वा) अयि प्रिये! निशा शीघ्रमागच्छतु।

निशा - आगतवती प्रिय! वदतु किमस्ति एतादृशं विशिष्टम् ।

सोहनलालः - पश्यतु अत्र। भवती सर्वकारीयसेवावृत्यर्थं यत्परीक्षां दत्तवती, तस्याः परीक्षायाः परिणामः अत्र प्रकाशितः।

निशा - (साश्चर्यम्) अस्तु एवम् । मम अनुक्रमाकं पश्यतु, उत्तीर्णा मया परीक्षा वा न वा ।

सोहनलालः - (सहर्षम्) न केवलं उत्तीर्णा अपितु भवती अत्रापि प्रथमं स्थानं प्राप्तवती ।

निशा - किं सत्यम् खलु?दर्शयतु मामपि।

सोहनलालः - आम् निश्चयेन। अत्र पश्यतु । भूरिशः शुभाशयाः भवत्याः कृते ।

निशा- प्रिय! भवतां कृते शुभाशयाः धन्यवादाश्च । भवतामेव एव ममोपरि विश्वासेन सहयोगेन च एतत्सर्वं साधितम् मया ।

सोहनलालः - समीचीनं सर्वम् । भवती इदानीं मिष्ठान्नम् आनयतु ।

निशा - अस्तु आनयामि (मिष्ठान्नं स्वीकृत्य, आगत्य) मिशन्नं स्वीकरोतु स्वामी।

सोहनलालः - इदानीं तु भवती सर्वकारीय-उच्चाधिकारिणी सञ्जाता, स्वकीयं मातरं पितरमपि दूरवाण्या एतत् सूचयतु ।

निशा - आम् सूचयिष्यामि । परञ्च मम मातुः पितुश्च स्थितिः समीचीना नास्ति । पितरौ वृद्धौ सञ्जातौ । मम भ्राता सौरभः प्रतिदिनं पितृन् ताडयति ।

सोहनलालः - एवं खलु । तर्हि आवां तत्र शीघ्रमेव गच्छावः ।

(उभौ निष्क्रान्तौ)

**( चतुर्थदृश्यः )**

सूत्रधारः - अत्र धनीरामस्य प्रियपुत्रः सौरभः इदानीं पितुः व्यवसायं निर्वहति। धनीरामः रोशनी च वृद्धौ सञ्जातौ। सौरभः सर्वदा पितृन् ताडयति, अपि च तान् वृद्धाश्रमं गमनार्थं वदति ।

(अत्र प्रविशति धनीरामस्य पुत्रः सौरभः)

सौरभः -(पितरं प्रति) भो वृद्ध! किं करोषि अत्र त्वम्?

रोशनी- पुत्र! कथमेवं भणसि त्वम् एषः भवतः जनकः, ससम्मानम् वार्तालापं करोतु।

सौरभः -(सक्रोधम्) ससम्मानं किमर्थम् ममोपरि भारमात्रमेव एषः वृद्धः। अस्य औषधादिषु मम व्यथमेव धनव्ययो भवति।

धनीरामः - (कारुण्येन)पुत्र! अहं स्वकीयं सर्वधनसम्पत्तिं तुभ्यमेव दत्तवान्। इदानीं त्वं किमर्थं एतादृशं दुर्व्यवहारं करोषि मया सह। बाल्यावस्थायां पितरौ पुत्रान् पालयति, पित्रोश्च
वृद्धावस्थायां पुत्रः तयोः सेवां करोति ।

सौरभः - (पुनरपि क्रोधेन) मौनं तिश्तु वृद्धः। एतादृशम् उपदेशं श्रोतुं न इच्छामि अहम्। शीघ्रातिशीघ्रं वृद्धाश्रमं गच्छताम् भवन्तौ अथवा मारयामि अत्रैव अहम्।

(पितरं ताडयितुमुद्यतः)

(तदैव धनीरामस्य पुत्री निशा ससैनिका प्रविशति)

निशा - तिष्ठतु भ्राता! (सैनिकौ तावत् सौरभं हस्ताभ्यां गृह्णतः), एते भवतः पालकाः। एते एव भवतः लालनं पालनं कृतवन्तः । भवान् इदानीम् एतान् ताडयितुम् उद्यतः, लज्जा नैव आगच्छति किम्? यदि भवान् पितृन् अस्याम् अवस्थायां नैव पालितुं शक्नोति चेत्, तर्हि अहं पितृन् स्वगृहं नेष्यामि ।

रोशनी - प्रियपुत्री! रक्षितौ आवां भवत्या। (धनीरामं प्रति) स्वामी! अस्माकं पुत्र्याः पितृस्नेहं पश्यतु ।

धनीरामः - आम् पश्यामि अहम् । मम मिथ्याभ्रममेव आसीत् यत् पुत्रः वृद्धावस्थायां सहायको भवति, अत्र तु सर्वथा विपरीतम् ।

रोशनी- पुत्री! एतौ सैनिकौ कुतः?

सोहनलालः-भवतां पुत्री इदानीं उच्चशिक्षां सम्प्राप्य सर्वकारीय-अधिकारिणी सञ्जाता। सर्वकारपक्षतः अस्याः संरक्षकरूपेण एतौ सैनिकौ नियुक्तौ ।

रोशनी - शुभाशयाः पुत्री! भूरिशः शुभाशयाः। भवती पठित्वा मम अभिलाषां पूरितवती। (सोहनलालं प्रति) भूयोभूयः धन्यवादाः पुत्रः यद् भवान् निशां पाठितवान् ।

धनीराम - (बद्धाञ्जलिः) क्षमायाचनां करोमि पुत्री । मया भवती नैव पठिता । अद्य भवत्या एव आवां रक्षितौ ।

निशा - नैवम् क्षमां याचयतु पितः! अहं भवतां पुत्री, अस्याम् अवस्थायां भवतां संरक्षणं ममापि कर्त्तव्यः ।

अद्यतनीये समये नास्ति एतादृशं किञ्चिदपि यत् कन्याः नैव कर्तुं शक्नुवन्ति। यदि कन्या सम्यक्तया पठिता स्यात् तदा सदा सर्वाणि कार्याणि कर्तुं शक्नोति । अतः समाजेन अपि मम एतदेव निवेदनमस्ति यत् -

**रक्षणीया सदा कन्या पाठनीया विशेषतः ।**
**रक्षिता पाठिता कन्या किं किं हितं न साधयेत् ॥**

**सोहनलालः-वाहनानि च सर्वाणि संयन्त्रसाधनानि च ।**
**चालयति च कन्याऽद्य वायुयानादिकं तथा ॥**
**रोशनी-स्थालापवायुसेनासु कन्यका चाद्य गच्छति ।**
**देशस्य चास्य रक्षायै वर्धनायास्य गौरवम् ।**
**धनीरामः-दुहिता भगिनी भार्या मातृरूपा च सर्वदा ।**
**रक्षति परिवारञ्च सर्वत्र नरसङ्गिनी ॥**
**सूत्रधारः-सर्वकारीयसेवासु अन्योद्योगेषु चैव हि ।**
**अद्याधिकारिण कन्या तत्कार्यप्रतिपादने ॥**
**सर्वे मिलित्वा-रक्षणीया ततः कन्या पाठनीया विशेषतः ।**
**रक्षिता पाठिता कन्या किं किं हितं न साधयेत्॥**

**॥ इति ॥**

# द्रेष्काणवशेन फलज्ञानम्

-सत्यानन्दझा
शोधच्छात्रः (स्नातकोत्तरज्योतिषविभागः)
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा, बिहारप्रदेशः

द्रेष्काणः, दृक्काणः, दुगाणः इति परस्परपर्यायवाचिनः शब्दाः। 'द्रेक्क-द्रेक्काण-दृक्काणाः भवन्ति द्रेष्काणवत्' इति परद्विरूपकोषात्। किञ्च 'दृग् ज्ञाने ज्ञातरि त्रिषु' इति 'काणोऽतिसूक्ष्मे' इति चामरकोषात् कणस्य भावः काणः धर्मः, ज्ञानं, बुद्धिः, ज्ञाता स्वयमिति स्व-बुद्धि-धर्माणां विचारभानो द्रेष्काणांशां कथ्यते। अतः एवोक्तं वराहमिहिरेण -

'दृक्काणाः स्युः स्वभवनतनुसुतत्रित्रिकोणाधिपानम्'

अपि च 'रूपात् कटपयपूर्वैवर्णक्रमाद् भवत्यङ्काः' इति महासिद्धान्तनियमात् दृक् = (द = 8, ऋ = 0 क = 1) 81 द्वादशतष्टितशेष 9, क = 1, ण = 5 इत्यत एव दृक्काणः प्रथम-पञ्चम-नवमपानामिति सिद्ध्यति।

एतावता सुनिश्चितमिदं यत् प्रत्येकराशेस्त्रिभागो द्रेष्काणः कथ्यते। तत्र प्रथमद्रेष्काणः स्वस्यार्थाज्जन्मलग्नाधिपतेः, द्वितीयो लग्नात् पञ्चमाधिपतेः, तृतीयो लग्नान्नवमाधिपतेरिति। एवञ्च प्रतिराशिं त्रयो द्रेष्काणः, मेषादिद्वादशराशीनां सर्वैकत्वे षट्त्रिंशद् द्रेष्काणाः भवन्तीति।

एषां द्रेष्काणानां क्रूरादिभेदेन चत्वारो भेदाः भवन्ति क्रूराः तोयचराः, सौम्याः, विमिश्राश्च। तत्र -

1.सिंह-मेष-कुम्भ-वृश्चिक-मकरराशीनां प्रथमद्रेषकाणाः, मीन-वृश्चिक-सिंह-तुलाराशीनां तृतीयद्रेष्काणाः, कर्क-वृश्चिकयोर्द्वितीयद्रेष्काणौ चेत्येकादश द्रेष्काणाः क्रूराः कथ्यन्ते।

2.कर्क-मीनयोः प्रथमद्रेष्काणौ, मीन-कन्ययोर्द्वितीयद्रेष्काणौ, वृष-मिथुनयोस्तृतीयद्रेष्काणौ चेति षड्द्रेष्काणाः तोयचराः (जलचराः) कथ्यन्ते।

3.मेष-धनु-वृष-मकरराशीनां द्वितीयद्रेष्काणाः, तुला-कन्या-मिथुनानां प्रथमद्रेष्काणाः, धनु-कन्या-कुम्भानां तृतीयद्रेष्काणाश्चेत्येकादशद्रेष्काणाः सौम्यः कथ्यन्ते।

4.मकर-मेष-कर्कराशीनां तृतीयद्रेष्काणाः, धनु-वृषयोः प्रथमद्रेष्काणौ, मिथुन-तुला-सिंहराशीनां द्वितीयद्रेष्काणाश्चेत्यष्टौ द्रेष्काणाः विमिश्रसंज्ञकाः कथ्यन्ते। तदुक्तं दैवज्ञवैद्यनाथेन-

कण्ठीरवाजघटकीटमृगाननाद्या
मीनालिसिंहवणिगन्त्यगता दृकाणाः।
क्रूरा भवन्ति कटकस्य सरीसृपस्य
मध्यस्थिताश्च बहुशः प्रवदन्ति सन्तः।।
कुलीरमीनादिगतौ दृकाणौ
मीनाङ्गनामन्दिरमध्यमौ च।
गोयुग्मयोरन्त्यगतत्रिभागौ
भवन्ति षट् तोयचरा दृकाणाः।।
मेषाश्विगोकुम्भमृगद्वितीय
तुलाधरस्त्रीयुगपूर्वभागः।
चापाङ्गनातोयधरान्त्ययाता
दृकाणसंज्ञाः प्रभवन्ति सौम्याः।।
मृगाजकर्क्यन्तगता दृकाणा
वृषस्य चापस्य च पूर्वयातौ।
नृयुग्मतौलीहरिमध्यगास्ते
विमिश्रसंज्ञा इति संवदन्ति।।

आचार्यवराहमिहिरानुसारन्त्वेतेषां चत्वारो भेदा एवं विधः सन्ति - वलः (सर्पः), उद्यतायुधः, चतुष्पदः, अण्डजश्च।

1.तत्र कर्कस्य द्वितीय-तृतीयद्रेष्काणौ, वृश्चिकस्य प्रथमद्वितीयद्रेष्काणौ, मीनस्य तृतीयद्रेष्काणश्चेति पञ्चद्रेष्काणाः व्याल (सर्प) संज्ञकाः।

2.मेषस्य प्रथम-तृतीयद्रेष्काणौ, मिथुनस्य द्वितीय-तृतीयद्रेष्काणौ सिंहस्य तृतीयद्रेष्काणः, कन्यायाः द्वितीयद्रेष्काणाः, तुलायास्तृतीयद्रेष्काणः, धनुषः प्रथम-तृतीयद्रेष्काणौ, मकरस्य तृतीयद्रेष्काणश्चेति नवद्रेष्काणाः उद्यतायुधसंज्ञकाः।

3.मेषस्य द्वितीयः, वृषस्य द्वितीय-तृतीयौ, कर्कस्य प्रथमः, सिंहस्य प्रथम-द्वितीय-तृतीयाः, तुलायास्तृतीयः, वृश्चिकस्य तृतीयः, धनुराशेः, प्रथमः मकरराशेः प्रथमश्चेति एकादशद्रेष्काणाः चतुष्पदसंज्ञकाः।

4.मिथुनस्य द्वितीयः, सिंहस्य प्रथमः, तुलायाः द्वितीयः कुम्भस्य प्रथमश्चेति चत्वरो द्रेष्काणा अण्डजा अर्थात् पक्षिद्रेष्काणाः कथ्यन्ते।

इत्येतद् विवरणं वराहमिहिरस्रू व्याद्योतायुधचतुश्चरणाण्डजेषु इति पंक्तेर्भटोत्पलीयव्याख्यानुसारं प्रतिपद्यते। तत्र वृष-प्रथम, मिथुन-पथम, कन्या-प्रथम-तृतीय, तुला-प्रथम, धनु-द्वितीय, मकर-द्वितीय, कुम्भ-द्वितीय, मीन-प्रथम-द्वितीय द्रेष्काणानामुल्लेखो नोपलभ्यत इत्यत एतेषां फलानि सामान्यराशिवद् ज्ञेयानि। ये च द्रेष्काणाः भेदद्वयान्तर्गतास्तेषां फलद्वयं बोध्यम्।

मेषादिराशिद्रेष्काणवशात् जातस्य फलनिरूपणम्

1.(क) मेषस्य प्रथमद्रेष्काणे यस्य जन्म स दाता प्रतिग्रहीता तेजस्वी ह्रासवृद्धियुक्तो विग्रहप्रियः बन्धुषु दण्डकर्ता च भवति।

(ख) द्वितीयद्रेष्काणे जातकः स्त्रीचञ्चलः अटनप्रियः रति-गीत-संगीतादिप्रियो मनस्वी मित्र-धनभाक् स्त्रीवित्तलोभी च भवति।

(ग) तृतीयद्रेष्काणजातो गुणी परदोषान्वेषी चञ्चलो राजसेवी स्वजनप्रियः धर्मात्मा आदरप्रियो मूर्खश्च भवति।

2.(क) वृषस्य प्रथमद्रेष्काणे जातः पान-भोजनप्रियः स्त्रीवियोगी वसन-भूषणप्रियो युवतिजनानुगामी च भवति।

(ख) तस्य द्वितीयद्रेष्काणे जातो रमणीयवपुः स्त्रीप्रियः स्थूलोष्ठो धनी मनस्वी च भवति।

(ग) तस्य तृतीयद्रेष्काणे जातश्चतुरोऽल्पभाग्यो वीरो मलिनोऽपव्ययसन्तप्तश्च भवति।

3.(क) मिथुनस्य प्रथमद्रेष्काणे जातो विशालभालः धनी उन्नतो धूर्तो गुणी विलासप्रियो राजमान्यो वचस्वी च भवति।

(ख) तस्य द्वितीयद्रेष्काणे जातो लघुमुखः सुशरीरः सूक्ष्मकचो भाग्यशाली कोमलचित्तो बुद्धिमान् प्रतापी यशस्वी च भवति।

(ग) तस्य तृतीयद्रेष्काणे जातः स्त्री-द्वेषी महाशिरः शत्रुयुतो रुक्षनख-पाद-करतलः चलसम्पद्युक्तश्च।

4.(क) कर्कस्य प्रथमद्रेष्काणे जातो देव-विप्रभक्तश्चञ्चलो गौरवर्णः परोपकारी सुदारो भाग्यशाली च।

(ख) कर्कस्य द्वितीयद्रेष्काणे जातो लोभी मधुरप्रियः शयनीशीलः स्त्रीवश्यः मानी विलासी रोगी च भवति।

(ग) तस्य तृतीयद्रेष्काणे जातः स्त्रीप्रियो धनी परदेशवासी मदिराप्रियो जलारण्यरुचिः कुदृष्टिश्च।

5.(क) सिहस्य प्रथमद्रेष्काणे जातो दाता जनपोषकः शत्रुजयी विपुलधन-स्त्री-मित्रादियुतो राजसेवी बलवांश्च भवति।

(ख) तस्य द्वितीयद्रेष्काणे जातः सत्कर्मी दाता स्थिरो रणप्रियः सुखी वेदानुगामी बुद्धिमांश्च भवति।

(ग) तस्य तृतीयद्रेष्काणे जातः परधनलोभी धीमान् धूर्तो बहुसन्ततिः प्रगल्भश्च भवति।

6.(क) कन्यायाः प्रथमद्रेष्काणे जातः श्यामवर्णः प्रियभाषी विनीतो दीर्घवपुः सुरुपः स्त्रीधननिष्ठः पिंगलनेत्रश्च भवति।

(ख)तस्याः द्वितीयद्रेष्काणे जातो धीरो विदेशवासी शिल्पकुशलो रणप्रियो मेधावी च भवति।

(ग) तस्यास्तृतीयद्रेष्काणे जातः संगीतज्ञो रातप्रियोऽल्पतनु विशालशिरः दीर्घनयनश्च भवति।

7.(क) तुलाप्रथमद्रेष्काणे जातः सुन्दरः कार्यकुशलः भ्रमणशीलः श्यामतनुः कला-वणिज्याभिज्ञो नियोगनिपुणो मेधावी च भवति।

(ख) तद्द्वितीयद्रेष्काणे जातः कमलनयनः प्रियभाषी साहसीभूषणप्रियो विख्यातस्ववंशपूर्वजानुचरश्च।

(ग) तत्तृतीयद्रेष्काणे जातश्चञ्चलः शठः कृतघ्नः कुरुपः कुटिलो मित्र-धन-कीर्तिहीनोऽल्पबुद्धिश्च भवति।

8. (क) वृश्चिकप्रथमद्रेष्काणे जातः गौरवर्णः स्थिरः क्रोधी राजप्रियः स्थूलदीर्घशरीरः कलाप्रियश्च भवति।

(ख) वृश्चिकस्य द्वितीयद्रेष्काणे जातको मिष्टान्नभोजी चञ्चलनेत्रः गौरवर्णः कान्तियुक्तः परवित्तयुक्तः गीतसंगीतादिज्ञाता च (कलाकारः) भवति।

(ग)वृश्चिकस्य तृतीयद्रेष्काणे जातो निःश्मश्रु(दाढी-कूँछहीन) पिंगलाक्षः महोदरः स्थूलबाहुः धीरचित्तः सहोदरहीनश्च भवति।

9. (क) धनुषः प्रथमद्रेष्काणे जातः परिमण्डलाक्षवक्त्रो मानवेषु श्रेष्ठः सदाचारयुक्तः कोमलचित्तो च भवति।

(ख) धनुद्वितीये द्रेष्काणे जातो शास्त्रार्थवेत्ता वक्ता यज्ञकर्ता विवेकी अनेकानेकतीर्थादिभ्रमणकारी च भवति।

(ग) धनुतृतीयद्रेष्काणे जातकः कुटुम्बादिप्रधानः चतुरः धर्मात्मा परस्त्रीगामी सुशरीरः यशस्वी च भवति।

1. (क) मकरस्य प्रथमद्रेष्काणे जातो दीर्घबाहुः श्यामवर्णः यशस्वी कान्तियुक्तः शठः स्मितभाषी स्त्री-धनयुक्तो च भवति।

(ख) मकरस्य द्वितीयद्रेष्काणे जातो लघुमुखः चञ्चलः परस्त्रीगामी परधनहर्ता चतुरः आस्तिको दाता च भवति।

(ग) मकरस्य तृतीयद्रेष्काणे जातो वाचालः दीर्घवपुः विदेशगमनात् दुःखी पितृहीनश्च भवति।

2. (क) कुम्भस्य प्रथमद्रेष्काणे जातः स्त्री-मान-यश-ऐश्वर्ययुक्तः कर्तव्यनिष्ठो धनी राजसेवी च भवति।

(ख) कुम्भस्य द्वितीयद्रेष्काणे जातको लोभी समर्थो मनोहरः गौरवर्णः पिंगलनेत्रः दद्धष्टवक्ता (संकोचहीनस्वभाव) बहुमित्रादियुतो बुद्धिमांश्च भवति।

(ग) कुम्भस्य तृतीयद्रेष्काणे जातो दीर्घः शठः प्रतापी अल्पबाहुः पुत्र-धनादियुक्तः असत्यवादी विशालनेत्रः कामज्ञश्च भवति।

3. (क) मीनस्थप्रथमद्रेष्काणे जातो मधुपिंगलनेत्रः गौरवर्णः सत्कर्मकर्ता पण्डितो बुद्धिमान् विनयुक्तश्च भवति।

(ख) मीनस्य द्वितीयद्रेष्काणे जातः स्त्रीसेवी मिष्ठान्नभोजी वित्तलोभी कामातुरः स्त्रीप्रियो वक्ता च भवति।

(ग) मीनस्य तृतीयद्रेष्काणे जातः श्यामवर्णः कलासु निपुणः स्थूलपादः मित्रादिसेवी मिष्ठान्नपानभोजी च भवति।

सन्दर्भग्रन्थाः

1. जातकपारिजात, श्रीदैवज्ञवैद्यनाथ, श्रीमातृप्रसादशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 2004
2. मुहूर्तचिन्तामणि, श्रीमद्रामदैवज्ञ, डॉ. ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, द्वितीयसंस्करण, 2000
3. बृहज्जातकम्, श्रीवराहमिहिर, डॉ. रामचन्द्रपाठक, चौखम्बा प्रकाशन, वाराणसी, वि. सं. 2063
4. बृहत्पराशरहोराशास्त्रम्,श्रीपराशरमुनि, दैवज्ञ पं. देवचन्द्रझा, चौखम्बा प्रकाशन, वाराणसी, वि. सं. 2069
5. सर्वार्थचिन्तामणि, श्रीवेङ्कटेशशर्मा, गुरुप्रसादगौड, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2011
6. सारावली, श्रीमद्कल्याणवर्मा, डॉ. मुरलीधरचतुर्वेदी, मोतीलाल बनारसीदास, वाराणसी, 2003

चतुर्थपुटस्य शेषभागः

## "संस्कृत वाङ्मये वर्णित...

**सर्वप्रथमं भामहः कथयति यत् "शब्दार्थौ सहितौ काव्यम्"। भर्तृहरि नीतिशतके कलायाः उपयोगितायां प्रति संकेतं कुर्वन् कथयति यत्– साहितयसंगीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः" अर्थात् प्राचीनकालादेव मनुष्यं मनुष्यवत् निर्माणे सर्वदा कलायाः उपयोगिताम् आसीत्। एतेषां कलानां विहीन मनुष्यः पशुवत् भवति।**

**रस विषये भरतः कथयति यत् –**

**यथा वीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा।[11]**
**तथा मूलं रसाः सर्वे तेम्योः भावा व्यवस्थिता।।**

**अर्थात् रसः सर्वाषां भावानां मूलमस्ति।**

**वर्तमान समये वयं या चित्रकलायां पश्यामः तस्याः कलायाः स्वरूपं नाट्यशास्त्रमेव अस्ति। यदा एषा कला यावत् आजीविका भवति तावत् सा शिल्पं क्राफ्टं वा भवति।**

**अतः उपर्युक्तात् विवेचनात् स्पष्टं भवति यत् वर्तमानसमये प्रचलित सर्वाषां कलानाम् आधार भरतस्य नाट्य शास्त्रमेव अस्ति। अस्योपयोगितायाः विषये भरतः कथयति यत्–**

**सर्वोपदशेजननं नाट्यमेतत् भविष्यति।**
**दुखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।**

1 विक्रमोर्वशीयम् 2/18
2 भाव प्रकाशन पृ. 287
3 भाव प्रकाशन पृ. 288
4 नाट्यशास्त्र
5 नाट्यशास्त्र 36.78
6 नाट्यशास्त्र 1.116
7 अभि. भारती भाग III पृष्ट संख्या – 146
8 नाट्यशास्त्र - 22/73
9 ना. शास्त्र 32/431
10 भरतकोश पृ. सं. – 324
11 न नाट्यशास्त्र 6, 31, 7

# नवभारतस्य निर्माणे संस्कृत प्रदत्त संस्कारानां भूमिका सर्पोत्तयोऽस्ति-डॉ कान्ता भाटिया

नवदेहली। भारतस्य युवा शक्ति विश्वे स्व उत्कृष्ट स्थानं स्थापयति। यदि इदं युवाशक्ति संस्कृतेन सम्बन्धितो भवेत् तर्हि भारतस्य नवनिर्माणे सहायको भविष्यति। विचारोऽयं संस्कृत प्रतिभापुरस्कार वितरण समारोहे दिल्ली संस्कृत अकादम्या उपाध्यक्षा डॉ. कान्ताभाटिया उक्तवती। डॉ भाटिया अध्यक्षीय सम्बोधने उक्तवती यत् शोध माध्यमेन ज्ञायते यत् विश्वस्य सर्वाषां भाषणां अध्ययनाय भाषाविज्ञानस्य आधार संस्कृतोऽस्ति। आस्मिन्नवसरे समारोहस्य मुख्यातिथि दिल्ली विधानसभासदस्य श्रीविशेषरवि उक्तवान यत् संस्कृत एका रोजगारपरक भाषाऽस्ति। युवकान् संस्कृतस्य माध्यमेन स्वव्यक्तित्व विकारस्य आवश्यकताऽस्ति।

अस्मिन्नवसरे विशिष्टातिथि उपशिक्षानिदेशक ललन कुमार झा, उक्तवान यत् संस्कृत भारतस्यपुरातनकालादेव सांस्कृतिक भाषाऽस्ति। अस्याः भाषायाः विकास एवं अध्यापनाय एक प्रयासस्य आवश्यकताऽस्ति। समारोहे पूर्व प्राचार्या श्रीमती कमलेश एवं सचिव जीतरामभट्ट स्वाभिमतं व्यक्तन्तौ।




# पृथ्वी

पृथ्वी कश्चित् ग्रहः अस्ति । सूर्यमण्डले पृथ्वी तृतीये क्रमाङ्के स्थिता अस्ति । पृथ्वीग्रहः सौरमण्डलस्य पञ्चमबृहत्तमः ग्रहः अस्ति । जीवनाय अनुकूलाः परिस्थितयः पृथ्व्याम् एव सन्ति । पृथ्वी अधिकोष्णा नास्ति, अधिकशीतलापि नास्ति । पृथ्व्यां वायुः, जलम् च अस्ति । जीवनस्य कृते वायुजलयोः आवश्यकता भवति । अत्र प्राणवायुः अपि अस्ति, येन श्वसनतन्त्रं चलति । अनेन कारणेन पृथ्वी सौरमण्डलस्य अद्भुतग्रहः विद्यते । पृथिव्याः प्रकृतिः विशिष्टा वर्तते । तस्य विषये इदानीम् अपि स्पष्टं नास्ति । पृथिव्याम् अनेकाः पदार्थाः सन्ति । पृथिव्याः उपरिभागः स्थलमण्डलेन आवृतः अस्ति । ज्वालामुखिना पृथिव्याः बहवः पदार्थाः बहिरागच्छन्ति । ज्वालामुखिनः अत्युष्णः द्रवपदार्थः, मृत्तिका, धूम्रः, अग्निः, मैग्मा च बहिरागच्छति । तेन एव वैज्ञानिकाः अनुमानं चिन्तयन्ति । वैज्ञानिकाः भौगोलिके संशोधने कार्यरताः भवन्ति । तेन वैज्ञानिकानां समीपं पृथिव्याः विषये विशिष्टं ज्ञानं भवति । अतः ते पृथिव्याः, ब्रह्माण्डस्य च संरचनायाः विषये सूक्ष्मतया जानन्ति ।भूगर्भस्य संरचना कथम् अस्ति ? तस्मिन् के पदार्थाः प्राप्यन्ते ? इति विषयम् आधृत्य वैज्ञानिकाः निरन्तरम् संशोधनं कुर्वन्तः सन्ति । पृथिव्याः केन्द्रे गन्तुं अशक्यम् अस्ति, किन्तु केवलम् अनुमानेन वैज्ञानिकाः ज्ञानं प्राप्नुवन्ति । प्रेक्षणैः अपि ते संशोधने नूतनान् विषयान् अवगच्छन्ति । भूगर्भस्य ज्ञानार्थं प्रत्यक्षाप्रत्यक्षौ स्रोतसी स्तः । ग्रहेषु पृथिव्याम् एव जीवनं सम्भवम् अस्ति । यतः जीवनाय भूमेः, जलस्य, वायोः च आवश्यकता वर्तते । तानि सर्वाणि तत्त्वानि पृथिव्याम् उपलब्धानि सन्ति । पृथिव्याः पर्यावरणस्य त्रयः महत्वपूर्णाः घटकाः परस्परं मिलन्ति, परस्परं प्रभावयन्ति च । पृथिव्याः पर्यावरणे त्रीणि मण्डलानि सन्ति । स्थलमण्डलं, जलमण्डलं, वायुमण्डलं च । पृथिव्यां जैवमण्डलम् अपि वर्तते । पृथिव्याः सर्वैः जीवधारिभिः जैवमण्डलस्य रचना अभवत् । एते सर्वे जीवधारिणः अन्यैः मण्डलैः सह पारस्परिकक्रियां कुर्वन्ति । पृथिव्याः सर्वे जीवितघटकाः जैवमण्डले विद्यन्ते । तेषु ङ्क पादपाः, जन्तवः, प्राणिनः, सूक्ष्मजीवाः च सन्ति । अधिकाः जीवाः स्थलमण्डले एव प्राप्यन्ते । किन्तु तेषु बहवः जीवाः वायुमण्डले जलमण्डले अपि प्राप्यन्ते । केचित् जीवाः मण्डलद्वये अपि स्वतन्त्रतया विचरणं कर्तुं शक्नुवन्ति । जैवमण्डलं, जैवमण्डलानां घटकाः च पर्यावरणस्य महत्वपूर्णानि तत्त्वानि सन्ति । एतानि तत्त्वानि भूम्या, जलेन, मृत्तिकया इत्यादिभिः सह पारस्परिकक्रियां कुर्वन्ति । तापमानेन, वर्षया, आर्द्रतया, सूर्यप्रकाशेन एतानि तत्त्वानि प्रभावितानि भवन्ति । जैविकघटकानां भूमिवायुजलैः सह परस्परम् आदानं, प्रदानं च जीवानां विकासाय च साहाय्याय कल्पते ।

– संकलनकर्ता –
कुलदिप महाराज
संचालक, साधुराज संस्कृत क्लासेस कंधार

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# अधरामृतं पीत्वा



डॉ.राजेन्द्र त्रिपाठी 'रसराज'
अध्यक्ष – संस्कृत विभाग
इलाहाबाद डिग्री कॉलेज,
इलाहाबाद विश्व विद्यालय, इलाहाबाद

अधरामृतं पीत्वा प्रीतिं मे मनसि वर्धय।
नयनाम्बुजं दृष्ट्वा मैत्रीं मे मनसि दर्शय ।1।

गगनेऽपिविना चन्द्रं तारा नहि शोभन्ते।
मुखमण्डलं स्पृष्ट्वा हस्तं मे शिरस्यर्पय ।2।

कुसुमं ललितं लब्ध्वा मधुपो गुञ्जति मधुरम्।
गायं गायं मधुरं सरसं गीतं श्रावय ।3।

पार्श्वैव निवसतापि क्रौञ्चः क्रौञ्च्यै क्रन्दति।।
अभिशप्तप्रणयपाशं दूरीकर्तुं मुञ्चय।।

दूरे दूरे भूत्वा दुर्लभं दर्शनं वै।
पार्श्वमागत्य प्रिये! स्वगतं प्रणयं जल्पय ।4।

शून्यं दृष्ट्वा गेहं लभते न रहसि सौख्यम्।
सार्धेन मया वसितुं संश्रित्य सपदि रञ्जय ।5।

दर्शं दर्शं फलके श्रावं श्रावं यन्त्रे।
मैत्रीं स्वीकृत्य सखे! चित्रैः सह त्वं सज्जय ।6।

मन्दं मन्दमागत्य सस्नेहं सुस्मित्वा।
सम्भूय सम्मुखं मे सन्तापं सन्तर्पय ।7।

रागानुरागिणी त्वं राधा रसिकस्य प्रिया।
रसराजं वीक्ष्य प्रिये मधुराभक्त्या ह्लादय ।8।



सौरभ द्विवेदी
शोधछात्र, साहित्य विभाग
काशी हिन्दू विश्वविद्यालय, वाराणसी

नार्याः रक्षणहेतवेह्यत्र वयसा प्राणाः स्वकीयाः हुताः
एकस्याः युवतेश्च मानदलनाज्जातं महाभारतम्।
यः देशश्च बहिष्करोति पततां सामाजिकं जीवनम्
जातः भारतनामकोह्ययमपि सः देशः बलात्कारिणाम्।।1।।
शास्त्राणां भणितिः प्रसिद्धवचना सर्वैरपि श्रूयते
देवानां रमणं भवेदिह तदा नारी यदा पूज्यते।
जाता किन्तु च मानमर्दनविधौ तासां पुनर्नैपुणी
अस्माकं हृदये मतौ नयनयोर्मानं न लज्जा न च।।2।।
एते कामिवकाः सुकोमलमतीन् विश्वासमुत्पाद्य वै
स्त्रीमीनान्नथ भक्षयन्ति विदयं तान् वंचनापूर्वकम्।
गृध्राः सन्ति विचारयन्ति युवतीरेते शवान्नान्यथा
एतान् गृध्रवकान् पुनर्मनुजतां हंसाः नयन्तु द्रुतम्।।3।।
पुत्रैः साम्यमिहाप्नुयुः प्रियसुताः पित्रोः स्वदृष्टौ कदा
नेतारो गुरवः प्रियाश्च सुहृदः स्युः शोषकाः नो कदा।
मार्गे शून्यजने विशेषसदने क्षेत्रे च कार्यस्थले
बालाः याः बहुभूमिकामधिगतास्ताः निर्भयाः स्युः कदा।।4।।
काश्मीराद्गतयः श्रियाः स्युरभयं कन्याकुमारीं कथम्
शुद्धां कामपि नः दिशां ददतु हे शान्तिप्रियाः सज्जनाः।
पुत्री काचन कस्यचिच्च भवताद्गीता न नैवासि ।
चिन्तेयं मम सौरभस्य मनसो जायेद्विनष्टा कथम्।।5।।

प्रथमपुटस्य शेषभागः

# राष्ट्रपतिमहोदयानां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे...

संवेदनशीलाः, चरित्रयुक्ताः परोपकारभावनया च संयुक्ताः स्युः। छात्रान्नभिप्रेरयन्तः ते कथितवन्तः यत् छात्राः श्रीलालबहादुरशास्त्रीमहाभागानां आदर्शान् स्वजीवने



धारयन्त्विति। समारोहस्याध्यक्षतां निर्वहन्तः कुलाधिपतयः डॉ. हरिगौतममहाशयाः विद्यापीठस्य सुविस्तृतायाः सारस्वतपरम्परायाः परिचयं प्रदत्तवन्तः। अस्मिन्नवसरे सारस्वतातिथयः नीति–आयोगस्य सदस्यवर्याः पद्मश्री डॉ. बिबेकदेबरायमहाभागाः, संस्कृतभाषायाः भारतीयसांस्कृतिकध ारोहरस्य च परिचयमददन्। श्रीदेबरायमहाशयाः अर्थशास्त्रिणः परं च ते वेद–उपनिषद्–महाकाव्य–पुराणादीनाम् आंग्लभाषायामनुवादस्य महत्वपूर्णं कार्यं कृतवन्तः। अस्मिन् शुभावसरे केरलस्थानाम् आचार्याणां श्रीगंगाधरनायरमहाभागानां भारतीयव्याकरण–भाषाविज्ञान–भारतीयदर्शनविचारपद्धतौ उल्लेखनीययोगदानाय 'महामहोपाध्याय' इत्युपाधिना

सम्माननमभवत्। अस्मिन्नेव क्रमे काशीस्थाः त्रिस्कन्धज्योतिषशास्त्रमर्मज्ञाः प्रो. रामचन्द्रपाण्डेयमहाभागा अपि ज्योतिर्विज्ञानक्षेत्रे मौलिकयोगदानार्थं 'महामहोपाध्याय' इत्युपाधिना समलंकृताः जाताः।

अस्मिन्नेव पावनावसरे पद्मश्रीडॉ. बिबेकदेबरायमहाभागाः अनुवादकौशल्यक्षेत्रे अतुलनीयावदानाय 'वाचस्पति' इत्युपाधिना विभूषिताः। अपि च कन्याकुमारीस्थस्य विवेकानन्दयोगानुसंधानकेन्द्रस्य कुलाधिपतयः डॉ. एच. आर. नागेन्द्रमहाभागाः अन्तरिक्षवैज्ञानिकाः सन्तोऽपि संस्कृत–योगयोः क्षेत्रे विशेषोल्लेखनीययोगदानार्थं 'वाचस्पति' इत्युपाधिना समलंकृताः जाताः। डॉ. नागेन्द्रमहाभागाः समारोहे विशिष्टातिथित्वेनापि उपस्थिता आसन्।

दीक्षान्तसमारोहे 2016–17 शैक्षणिकवर्षे 26 स्वर्णपदकपुरस्कृतानां छात्राणां सम्माननमपि अभवत्। अस्मिन्नवसरे 56 विद्यावारिधिछात्राः, 32 विशिष्टाचार्यछात्राः, 93 आचार्यछात्राः, 78 शास्त्रीछात्राः, 151 शिक्षाशास्त्रीछात्राः, 12 शिक्षाचार्यछात्राः, 01 वास्तुपी.जी.डिप्लोमाछात्रः, 12 योगपी.जी.डिप्लोमाछात्राः, ज्योतिषप्राज्ञ–ज्योतिषभूषण–भैषज्यज्योतिष–संस्कृतपत्रकारिताछात्राः तत्तदुपाधिना समलंकृताः। 2 एन.सी.सी. तथा च 09 क्रीडाप्रतियोगितासु सफलाः विद्यार्थिनः अपि पुरस्कृताः अभवन्।

कुलसचिवाः डॉ. अलकारायमहाशयाः सम्पूर्णसमारोहे अनुशासनदायित्वस्य निर्वहणं कुशलतापूर्वकं कृतवती। अस्मिन् समारोहे विद्यापीठकार्यपरिषदः सदस्याः, विद्वत्परिषदः सदस्याः, समस्तसंकायानां सदस्याः, विद्यापीठस्य छात्राः छात्र्यश्च, गैरशैक्षणिकाः प्रशासनिकाश्चाधिकारिणः कर्मचारिणश्च, मीडियाकर्मिणः, सुरक्षाकर्मिणः, पुलिसाधिकारिणश्च तत्परतापूर्वकं मनोयोगेन सहयोगं प्रदत्तवन्तः। विद्यापीठस्य छात्राः राष्ट्रगान–कुलगीतिकादिकानां संगीयमयं प्रस्तुतिना सभां सफलीकृतवन्तः। प्रायः 1300 दर्शकाणां समुस्थितिना सभागारः पूर्णरूपेण पूरित आसीदिति।

# वेब्जमाध्यमेन वैदिकसाहित्ये भारतस्य भौगिलिक विवरण विषये संगोष्ठी

नवदेहली। वैदिकसाहित्ये भारतस्य भौगिलिक विवरण विषये वेब्जमाध्यमेन भारतीयविद्याभवनस्य संगोष्ठी कक्षे एक मुख्य व्याख्यान 21 अप्रैल 2018 तमे दिनाके आयोजितमभवत्। अस्य व्याख्यानस्य मुख्यवक्ता वेदविशेषज्ञ मृगेन्द्र विनोद आसीत्। भारतस्य रक्षामंत्रालयस्य उपनिदेशक डॉ. ए.के.मिश्रा मुख्यातिथि रुपे आसन्। कार्यक्रमस्य सफलग्योजनं दिल्ली संस्कृतआकादम्याः



पूर्वसचिव डॉ. धमेन्द्रकुमारशास्त्री महोदयस्य अध्यक्षतामभवत्।

श्रीमृगेन्द्रविनोद वैदिकग्रन्थानां तं भागं स्वीयव्याख्याने प्रस्तुत कृतवान यस्मै प्राचीन भुगोलस्य वर्णमस्ति। सारस्वतसत्र एवं दर्शदूतसत्र वैदिकक्रियाकलापे महत्वपूर्ण स्थानं स्थापयति। अग्निहोत्रतः आश्वमेघ पर्यन्तं सर्वे यज्ञः उचितस्थाने भवति। परज्य सत्रद्वयं एतादृशमस्ति यो सरस्वती वदी एवं दृष्टवती नद्यः तटे सफलतापूर्वक भवति। सारस्वत सत्र एतादृशमस्ति येषु यज्ञवेदी सर्वदा चलायमान भवति। अयं विनशन स्थानतः प्रारंभो भवति, यत्र सरस्वती रेगिस्ताने लुप्तो भवति। प्रतिदिनं एतादृशं यो करोति सः शम्या स्व दक्षिणतः उपरि त्यजति अथवा सरस्वती नद्यः दिगिव्यजति। एवं प्रकारेण चलायमान विधि माध्यमेन एक वर्षे 18 कि.मी. पर्यन्तं नाच्छति अस्यां यात्राणं दृष्टवती नदीं गमनं भवति। तदनन्तरं वैदिक ग्रन्थेषु आयं संगम विनाशनेन 8 अश्विनस्य अग्रे कथितलमस्ति एक अश्विन 10 कि.मी. भवति। एवं प्रकारेण विनशन एवं लक्ष प्रप्तस्य अन्तरं 440 कि.मी. अस्ति। यत्र गमनाय 22 वर्ष समय अपेक्षितोऽस्ति। एवंप्रकारेण दृष्टवती सत्रस्य विषये उक्तवान यत दृषद्वती नद्यः भौगोलिक स्थानस्य वर्णनकरोत। श्रीविनोदः स्व सहधार्मिनि श्रीमती सुव्रताविनोदेन सह महाभारते वर्णित वलरामतीर्थयात्रा सदृश सरास्वती नद्यः पदयात्रा 21.11.2017 तः 5.1.2018 पर्यन्त कृतवान। अस्मांमायोजने बहु विद्वांसः गम्भीर चर्चामपि कृतवन्तः।

डॉ.ए.के.मिश्रा धर्म एवं मोक्षस्य महत्वे उक्त्वा पुरूषार्थस्य चर्चाम् अकरोत्। गुप्तचर प्रणाल्यां भौगोलिक ज्ञानस्य विषये उक्तवान। अध्यक्षीय वक्तव्ये डॉ. धमेन्द्रशास्त्री वेदस्य सर्वकालिकतायाः विषये उक्तवान दिव्यदृष्टिमाध्यमेन ऋषिः वैदिक वैदिकमन्त्राणां साक्षात्कारः कृतवान यं केवलं यौगिक बुद्धिमाध्यमे नैव अवगन्तुं शक्यते। डॉ. शास्त्री मुख्यवक्ता माध्यमेन सतपथब्राह्मणस्य गम्भीर तथ्यस्य अध्ययन विषये प्रशंसा कृतवान।

अस्मिन्नवसरे प्रो. भूदेवशर्मा, डॉ.गणेशदत्तशर्मा, श्रीविद्यासागरवर्मा, योगेन्द्र दत्त, डॉ. शुक्लामुखर्जी, श्रीवेदवीर आर्य, डॉ. आशापाण्डेय, डॉ. सरोजचावला, डॉ. ललिताजुनेजा, डॉ. दीक्षाविद्यालंकार डॉ. चाँदभारद्वाज, डॉ. रजनीशशुक्ल, श्री वाई.के.वाधवा, डॉ. रंजीतवेहरा, डॉ. अपर्णाधीर, डॉ. विजयशंकर द्विवेदी, डॉ. रीनासबलोक उपस्थिताः आसन्। डॉ शशितिवारि अध्यक्षा वेब्जमाध्यमेन लिखित जगतगुरू आदिशंकराचार्य पुस्तकस्य विमोचनं डॉ. धर्माशर्मा एवं मंचे उपस्थित गणमान्य अतिथि माध्यमेनाभवत्। पुस्तकमिदं दिल्लीसंस्कृतअकादमी माध्यमेन प्रकाशितोऽस्ति। शांति पाठ माध्यमेन कार्यक्रमस्य समापनमभवत्।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेल: sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।